श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

# भूस्तुतिः

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ताचार्य वर्यो मे सन्निधत्तां सदा हृदि ॥

सङ्कल्प कल्प लतिकाम् अवधीं क्षमायाः
स्वेच्छा वराह महिषीं सुलभानुकम्पाम्
विश्वस्य मातरम् अकिञ्चन कामधेनुम्
विश्वंभराम् अशरणः शरणं प्रपद्ये ॥१

त्वम् व्याहृतिः प्रथमतः प्रणवः प्रियस्ते
संवेदयत्यखिल मन्त्र गणस्तमेव ।
इत्थं प्रतीत विभवाम् इतरेष्विदानीं
स्तोतुं यथावदवने क इवार्हति त्वाम् ॥२

नित्यं हिताहित विपर्यय बद्ध भावे
त्वद्वीक्षणैक विनिवर्तय बहु व्यपाये ।
मुग्धाक्षरैरखिल धारिणि मोदमाना
मातः स्तनन्धय धियं मयि वर्तयेथाः ॥३

सङ्कल्प किंकर चराचर चक्रवालं
सर्वाति शायिनं अनन्त शयस्य पुंसः ।
भूमानम् आत्म विभवैः पुनरुक्तयन्ती
वाचाम् अभूमिर् अपि भूमिर् असि त्वमेका ॥४



rmvenkat@yahoo.com

वेधस्तृणावधि विहार परिच्छदम् ते
विश्वं चराचरतया व्यतिभिद्य मानम्।
अम्ब त्वदाश्रित तया परिपोषयन्ती
विश्वंभरस्य दयिताऽसि तदेक नामा॥५

सर्वं सहेत्यवनिरित्य चलेति मातः
विश्वंभरेति विपुलेति वसुन्धरेति।
अन्यानि चान्य विमुखान्य भिधान वृत्या
नामान्यमूनि कथयन्ति तवानु भावम्॥६

तापान् क्षिपन् प्रसविता सुमनो गणानां
प्रच्छाय शीतल तलः प्रदिशन् फलानि।
त्वत्सङ्गमात् भवति माधवि लब्धपोषः
शाखा शतैर् अधिगतो हरि चन्दनोऽसौ॥७

स्मेरेण वर्धित रसस्य मुखेन्दुना ते
निस्पन्दतां विजहतो निजया प्रकृत्या।
विश्रान्ति भूमिरसि तत्व तरङ्ग पङ्क्तेः
वेलेव विष्णु जलधेः अपृथग्भवन्ती८

स्वाभाविके वसुमति श्रुतिभिर् विभाव्ये
पत्युर् महिम्नि भवतीं प्रतिपन्न वासाम्।
शङ्के विमान वहन प्रतिमा समानाः
स्तम्बेरम् प्रभृतयोऽपि वहन्ति सत्वाः॥९

संभावयन् मधुरिपुः प्रणयानुरोधात्
वक्षः स्थलेन वरुणालय राज कन्याम्।
विश्वंभरे बहुमुख प्रतिपन्न भोगः
शेषात्मना तु भवतीं शिरसा दधाति॥१०

क्रीडा वराह दयिते कृतिनः क्षितीन्द्राः
सङ्क्रन्दस् तदितरेऽपि दिशामधीशाः।

आमोदयन्ति भुवनानि अलिक आश्रितानाम्
अम्ब त्वदङ्घ्रि रजसां परिणाम भेदैः ॥११

भूतेषु यत् त्वदभिमान विशेष पात्रं
पोषं तदेव भजतीति विभावयन्तः।
भूतं प्रभूतगुण पञ्चकम् आद्यमेव
प्रायो निदर्शनतया प्रतिपादयन्ति ॥१२

कान्तस्तवैष करुणा जलधिः प्रजानाम्
अज्ञातिलङ्घन वशादु पजात रोषः।
अह्नाय विश्व जननि क्षमया भवत्या
सर्वावगाहन सहाम् उपयात्य वस्थाम् ॥१३

आश्वासनाय जगतां पुरुषे परस्मिन्
आपन्न रक्षण दशाम् अभिनेतु कामे।
अन्तर्हितेतर गुणादबला स्वभावात्
औदन्वते पयसि मज्जनम् अभ्यनैषीः ॥१४

पूर्वं वराह वपुषा पुरुषोत्तमेन
प्रीतेन भोगि सदने समुदीक्षितायाः।
पादाहताः प्रलय वारिधयस्तवासन्
उद्वाह मङ्गल विधेर् उचिता मृदङ्गाः ॥१५

व्योमाति लङ्घिनि विभोः प्रलयाम्बुराशौ
वेशान्त लेश इव मातुम् अशक्य मूर्तेः।
सद्यः समुद्र वसने सरसैर् अकार्षीः
आनन्द सागरं अपारं अपाङ्ग पातैः ॥१६

दम्ष्ट्र विदारित महासुर शोणिताङ्कैः
अङ्गैः प्रयस्तव दधे परिरम्भ लीलाम्।
सा ते पयोधि जल केलि समुत्थितायाः
सैरन्ध्रिकेव विदधे नवम् अङ्गरागम् ॥१७



rmvenkat@yahoo.com

अन्योन्य संवलन जृम्भित तूर्य घोषैः।
संवर्त सिन्धु सलिलैर् विहिताभिषेका।
एकात पत्र्यसि विश्वमिदं गुणैः स्वैः
अध्यास्य भर्तुर् अधिकोन्नतम् अंस पीठम्॥१८

भर्तुस्तमाल रुचिरे भुज मध्य भागे
पर्याय मौक्तिकवती पृषतैः पयोधेः।
तापानुबन्ध शमनी जगतां त्र्याणां
तारापथे स्फुरसि तारकिता निशेव॥१९

आसक्त वासव शरासन पल्लवैस्त्वां
संवृद्धये शुभ तटिद्गुण जाल रम्यैः।
देवेश दिव्य महिषीं धृत सिन्धु तोयैः
जीमूत रत्न कलशैर् अभिषिञ्चति द्यौः॥२०

आविर्मदैरमर दन्तिभिर् उह्यमानां
रत्नाकरेण रुचिरां रशना गुणेन।
मातस्त्रिलोक जननीं वन मालिनीं त्वां
माया वराह महिषीम् अवयन्ति सन्तः॥२१

निष्कण्टक प्रशम योग निषेवणीयां
छाया विशेष परिभूत समस्त तापाम्।
स्वर्गा पवर्ग सरणिं भवतीमुशन्ति
स्वच्छन्द सूकर वधूम् अधूत पङ्काम्॥२२

गण्डोज्वलां गहन कुन्तल दर्शनीयां
शैलस्तनीं तरल निर्झर लम्ब हाराम्।
श्यामां स्वतस्त्रियुग सूकर गेहिनि त्वं
व्यक्तिं समुद्र वसनां उभयीं बिभर्षि॥२३

निः संशयैः निगम सीमनि विष्णु पत्नि

प्रख्यापितं भृगु मुखैर् मुनिभिः प्रतीतैः।
पश्यन्त् यनन्य पर धी रस संस्तुतेन
सन्तः समाधि नयनेन तवानु भावम्॥२४

संचोदिता करुणया चतुरः पुमर्थान्
व्यातन्वती विविध मन्त्र गणोपगीता।
संचिन्त्यसे वसुमति स्थिर भक्ति बन्धैः
अन्तर् बहिश्च बहुधा प्रणिधान दक्षैः॥२५

क्रीडा गृहीत कमलादि विशेष चिह्नां
विश्राणिताभय वरां वसुधे सभूतिम्
दौर्गत्य दुर्विष विनाश सुधा नदीं त्वां
संचिन्तयन् हि लभते धनदाधिकारान्॥२६

उद्वेल कल्मष परम्परिताद् अमर्षात्
उत्तं सितेन हरिमञ्जलिना अप्यधृष्यम्।
आकस्मिकोऽयमधिगम्य यति प्रजानाम्
अम्ब त्वदीय करुणा परिणाम एव॥२७

प्रत्येकम् अब्द नियुतैर् अपि दुर्व्यपोहात्
प्राप्ते विपाक समये जनितानुतापात्।
नित्यापराध निवहाच्चकितस्य जन्तोः
गन्तुं मुकुन्द चरणौ शरणम् क्षमे त्वम्॥२८

त्राणाभिसन्धि सुभगेऽपि सदा मुकुन्दे
संसार तन्त्र वहनेन विलम्बमाने।
रक्षा विधौ तनुभृताम् अनघानुकम्पा
मातः स्वयं वितनुषे महतीमपेक्षाम्॥२९

धर्म द्रुहं सकल दुष्कृति सार्व भौमम्
आत्मान भिज्ञम् अनुताप लवोज्झितं माम्।
वैतान सूकर पतेश्चरणार विन्दे

सर्वं सहे ननु समर्पयितुम् क्षमा त्वम् ॥३०

तापत्र्यीं निरवधिं भवती दयार्द्राः
संसार घर्म जनितां सपदि क्षिपन्तः ।
मातर् भजन्तु मधुरामृत वर्ष मैत्रीं
माया वराह दयिते मयि ते कटाक्षाः ॥३१

पत्युर् दक्षिण पाणि पङ्कज पुटे विन्यस्त पादाम्बुजा
वामं पन्नग सार्व भौम सदृशं पर्यङ्कयन्ती भुजम् ।
पोत्र स्पर्श लसत् कपोल फलका फुल्लार विन्देक्षणा
सा मे पुष्यतु मङ्गलान् यनुदिनं सर्वाणि सर्वं सहा ॥३२

अस्ये शाना जगत इति या श्रूयते विष्णुपत्नी
तस्याः स्तोत्रं विरचितमिदं वेङ्कटेशेन भक्त्या ।
श्रद्धा भक्ति प्रचय गुरुणा चेतसा संस्तुवानो
यद्यत् काम्यं सपदि लभते तत्र तत्र प्रतिष्ठाम् ॥३३

कवितार्किक सिंहाय कल्याण गुण शालिने ।
श्रीमते वेङ्कटेशाय वेदान्त गुरवे नमः ।

---

Please send your comments and suggestions to R.Venkat



rmvenkat@yahoo.com